# ॥ श्री मूलदुर्गा अष्टोत्तर शतनाम स्तोत्रम् ॥

दुर्गा शिवा महालक्ष्मीः महागौरी च चण्डिका ।
सर्वज्ञा सर्वलोकेशी सर्वकर्मफलप्रदा ॥ १ ॥
सर्वतीर्थमयी पुण्या देवयोनिरयोनिजा ।
भूमिजा निर्गुणाधारशक्तिश्चानीश्वरी तथा ॥ २ ॥
निर्गुणा निरहङ्कारा सर्वगर्वविमर्दिनी ।
सर्वलोकप्रिया वाणी सर्वविद्याधिदेवता ॥ ३ ॥
पार्वती देवता चावनीशा विन्ध्यवासिनी ।
तेजोवती महामाता कोटिसूर्यसमप्रभा ॥ ४ ॥
देवता वह्निरूपा च सतेजा वर्णरूपिणी ।
गुणाश्रया गुणमध्या गुणत्रयविवर्जिता ॥ ५ ॥
कर्मज्ञानप्रदा कान्ता सर्वसंहारकारिणी ।
धर्मज्ञाना धर्मनिष्ठा सर्वकर्मविवर्जिता ॥ ६ ॥
कामाक्षी कामसंहर्त्री कामक्रोधविवर्जिता ।
शाङ्करी शाम्भवी शान्ता चन्द्रसूर्याग्निलोचना ॥ ७ ॥
सुजया जयभूमिष्ठा जाह्नवी जनपूजिता ।
शास्त्रा शास्त्रमयी नित्या शुभा चन्द्रार्धमस्तका ॥ ८ ॥
भारती भ्रामरी कल्पा कराळी कृष्णपिङ्गळा ।

ब्राह्मी नारायणी रौद्री चन्द्रामृतपरिसृता ॥ ९ ॥

ज्येष्ठेन्दिरा महामाया जगत्सृष्ट्यधिकारिणी ।

ब्रह्माण्डकोटिसंस्थाना कामिनी कमलालया ॥ १० ॥

कात्यायनी कलातीता कालसंहारकारिणी ।

योगनिष्ठा योगिगम्या योगिध्येया तपस्विनी ॥ ११ ॥

ज्ञानरूपा निराकारा भक्ताभीष्टफलप्रदा ।

भूतात्मिका भूतमाता भूतेशा भूतधारिणी ॥ १२ ॥

स्वधा नारीमध्यगता षडाधारादिवर्धिनी ।

मोहिता शुभदा शुभ्रा सूक्ष्ममाता निरालसा ॥ १३ ॥

निमग्ना नीलसङ्काशा नित्यानन्दा परापरा ।

सर्वज्ञानप्रदानन्दा सत्या दुर्लभरूपिणी ॥ १४ ॥

सरस्वती सर्वगता सर्वभीष्टप्रदायिनी ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]